

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:5(1), May 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# पातञ्जलयोगदर्शने समाधिपादस्य विवरणम्

## "Description of the Samādhi Pāda in Patañjali's Yoga Philosophy."

Dr.VIDYASAGAR BABU DARA
LECTURER IN SANSKRIT
S G V ORIENTAL COLLEGE
THIMMASAMUDRAM
dvsbabu987@gmail.com

### प्रस्तावना

अद्यतनकाले योगशब्दः केवलशारीकव्यायामपर्यायतया व्यवहृतः । एवं पतञ्जलयोगदर्शनमपि शरीरसम्बन्धव्यायामबोधकमेवेति सर्वेषाम् आधुनिकानामभिप्रायः। ते आसनं प्राणायाममात्रमेव योगमामनन्ति । किन्तु मनसः आनन्ददायकं सम्पूर्ण योगतत्वं न जानन्तीति योगशास्त्रविमर्शकैर्बहुधा निरूपितम् । प्राणायामासने योगस्य बाह्यस्वरूपनिरूपके तन्मात्रेण पर्याप्तत्ववचनं अर्थस्य संक्षिप्तीकरणमेवेति ।

योगदर्शने पादनामकाः चत्वारो विभागाः वर्तन्ते । पादशब्दरूपेण विभागोपि साभिप्राये दृष्टः । यदि एकस्यापि पादस्याभावे समीचीनगतिः दर्शनस्य न स्यादिति । यथा वृषभस्य चत्वारः पादास्तस्य स्थितिहेतवस्तथा दर्शनस्यास्य पादाः अपि स्थितिहेतवः । वृषभशब्दः परमात्मनि रूढो वेदेषु दृश्यते । चत्वारिश्रुङ्गास्त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महादेवो मर्त्यांमाविवेशः ।।

### समाधिपादस्य परिचयः

योगस्य मौलिकं स्वरूपं निर्वक्तुं योगः चित्तवृत्तिनिरोधः इति सूत्रं निरूपितम् । चित्तवृत्तिनिरोधाय को वा यत्नः कार्यः, किं साधनं, को वा व्यापारः कीदृशीसिद्धिरिति चतुर्णां विषयाणां विवृतौ समाधिः चित्तनिरोधे मुख्यं कारणमिति तन्नाम्ना समाधिपादः निरूपितः । मनसः चञ्चलत्वात् सर्वत्र विधिनिषेधस्य अदर्शनेन गमनाश्च मनसः क्लेशं उत्पद्यते । काश्चन मनोवृत्तयः क्लेशकराः भवन्ति । काश्चन अक्लिष्टाश्च । कस्मिन्नपि विषये स्थिरो निश्चयो मनसो न भवति । एवं मनोवृत्तीनां अनन्तत्वेपि तासु साधारणम् अनुगतं लक्षणमवेक्ष्य पञ्चविधत्वं प्रकल्प्य तन्निवृत्तये समाधिरेव कारणमिति निरूपयितुं समाधिपादः आरब्धः । योगस्वरूपं मुख्यो योगहेतुः इति प्रधानं विषयद्वयमत्र निरूपितम् । सम्यक् आधीयते मनः इति समाधिरिति पादस्यास्य सार्थकं नाम ।

### समाधिपादे प्रतिपादितविषयाः

प्रथमे समाधिपादे एकपञ्चाशत् सूत्राणि वर्तन्ते । तत्रादौ अथ योगानुशासनम् इति शास्त्रारम्भाधिकारो निरूपितः। तत्र व्यासभाष्ये चित्तस्य विषयाः चित्तस्य योगानुकूलाः विषयाश्च निरूपिताः। योगद्वैविध्यं प्रथमभेदकारणानि च निरूपितानि ।

#### अ)चित्तभूमयः

चेतति अनेन सर्वे विषयाः इति, चेतनं इति वा अर्थे **चितीसंज्ञाने** इति धातोः क्त प्रत्यये चित्तमिति रूपम् । **चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः** इत्यमरः । ज्ञानविषयत्वात् मनसः अशिष्यत्वात् चित्तं सर्वेषु विषयेषु व्याप्नोति एव । अत एव योगोऽपि चित्तस्य धर्मः एव । सच सार्वभौमः । चित्तस्य धर्मः इति विवृण्वता भाष्यकारेण चित्तस्यापि सार्वभौमत्वमुक्तम् । सर्वभूमेः ईश्वरः, सर्वभूमौ विदितो वा सार्वभौमः । अत एव तस्य अनेके भूमयो भवन्ति । किन्तु तासां भूमीनां अनुगतं धर्ममङ्गीकृत्य पञ्चधा विभागः अङ्गीकृतः ।

**क्षिप्तं मूढं विक्षिप्तमेकाग्रनिरुद्धमिति चित्तभूमयः ।**

1. **क्षिप्तम् -**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:5(1), May 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

सत्वरजस्तमोगुणानां मिश्रणस्य अनुपातमाश्रित्य चित्तभूमीनां भेदो भवन्ति । रजो गुणेन शब्दस्पर्शरूपरसगन्धानां नैरन्तर्येण चित्तस्य आत्मन्तास्थिरता क्षेपः । तेन अस्थैर्येण व्याप्तं चित्तं क्षिप्तम्। एवं विधा चित्तवृत्तिः दैत्यदानवानां द्रव्यमद्वतां भ्रान्तानां च भवति । क्षिपप्रेरणे इति धातोः निष्पन्नः क्षिप्तशब्दो रजोगुणेन प्रेरितमिति सार्थकविशेषमपि भवति ।

**2. मूढः** -

मूढशब्दः मुहत्वैचित्ये इति धातोः निष्पन्नः । वैचित्यं अविवेकः। अविवेकोपहतं चित्तं मूढं भवति । तमोगुणस्य वृच्या कर्तव्याऽकर्तव्यविवेकनाशेन कामक्रोधादिना शास्त्रविरुद्धं कुर्वतः चित्तं मूढं भवति । तस्मिन् निद्रातन्द्रादयो वर्जनीयाः गुणाः भवन्ति। एवं विधं चित्तं राक्षसपिशाचादीनां च भवति। उन्मत्ताः अपि मूढाः भवन्ति ।

**3. विक्षिप्तम्** -

क्षिप्तापेक्षया ईषत् श्रेष्ठं सत्वगुणस्याविर्भावात् तदा तदा प्राप्तस्थैर्यं चित्तं विक्षिप्तमुच्यते । एवं विधदेवानां जिज्ञासायाः आरम्भदशायां वर्तमानानां च भवति । किन्तु अत्र व्याधिस्त्यानादयो योगविघ्नदोषाः भवन्ति । एवं नवविघ्नैर्मनः बहुधा चलितं भवति ।

**4. एकाग्रम्** -

एकम् अग्रम् लक्ष्यं यस्य तत्र एकाग्रं वृत्तिबहुत्वस्य निरोधनं एकाग्रम् । योगिनः आद्य दशायां चित्तमेकाग्रं भवति।

**5. निरुद्धम्** -

रुधिर् - आवरणे इति धातोः कर्मणि क्त प्रत्ययो रूपं चिञ्चलतेन वद्धं इत्यर्थः । एतासु चित्तभूमिषु प्रथमे द्वे न योगानुफले । इतराः तिस्त्रः क्रमेण अभिवृद्धाः योगसाधनतां प्राप्नुवन्ति । न ताः एव योगः । किन्तु कैवल्यस्य सहायिकाः तुरीय पञ्चमभेदौ योगकोट्यां गणयितुमर्हे । सर्वमेतत् अभिप्रेत्य चित्तभूमीनां योगस्य योग्यता अयोग्यविचारो भाष्ये स्वयं निरूपितः ।

तत्र विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्तते । यस्त्वेकाग्रे चेतसि सद्भुतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्मबन्धनानि श्लाथयति निरोधमभिमुखं करोति स संप्रज्ञाता योग इत्याख्यायते । स च वितर्कानुगतो विचारानुगतानन्दानुगतोऽस्मितानुगत इत्युपरिष्टान्निवेदयिष्यामः । सर्ववृत्तिनिरोधे संप्रज्ञातः समाधिः । योगभूमीनां गुणाश्रितत्वात् तत्कारणभूतानां गुणानामपि पर्यालोचनं करणीयमेव । गुणानां लक्षणगुणवता प्रवृत्तिः यद्यपि पुराणेषु दर्शनेषु बहुधा निरूपितं तथापि योगदर्शने प्रायशस्सर्वत्र भगवद्गीताः व्याख्यातृभिः प्रमाणरूपेणोदाहृता । अतो गुणानां स्वरूपमपि भगवद्गीतोक्तदिशा निरूप्यते । चतुर्दशेऽध्याये गुणत्रयविभागयोगो नाम पृथक् योगोपि वर्तते । गुणातीतः परब्रह्मवासुदेवः स्वच्छया गुणानाङ्गीकृत्य हिरण्यगर्भरूपेण जगत्स्त्रष्टुं प्रवर्तते । गुणभेदेन परमात्मा एव सर्वाः मूर्तीः सृजति। एवं गुणाः एव अव्ययं परमात्मानं जीवात्मरूपे देहे निवघ्नन्तीति गीतासूपदिष्टम् ।

**सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।**
**निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ।।**

गुणाः निवघ्नन्तीति अनेन गुणानां जन्मप्राप्तौ कारणत्वं अङ्गीकृतम् । एते गुणाः निवघ्नन्तीति अनेन गुणानां जन्मप्राप्तौ कारणत्वं अङ्गीकृतम् । एते गुणाः कृष्णनीलादिवत् न द्रव्याश्रिताः । निवघ्नन्तीति न वास्तवबन्धनकारणत्वम् । यतः आत्मा कैरपि न बद्ध भविष्यति 1 निवघ्नन्तीव भवन्तीति पारिभाषिकवन्धनमङ्गीकरणीयम् । क्षेत्रज्ञः परमात्मा स्वतन्त्रः गुणाः आत्मनि परतन्त्राः एतेषां साम्यवैषम्येन जन्मप्रवृत्तिश्च भवतीति शङ्करभाष्ये स्पष्टम् ।

पञ्चमश्लोकव्याख्याने यथा सत्त्वरजस्तम इति एवं नामानः गुणाः इति । पारिभाषिकः शब्दो न रूपादिवत् द्रव्याश्रितः । न च गुणगुणिनोरन्यत्त्वमत्र विवक्षितम्। तस्माद् गुणाः इव नित्यपरतन्त्राः क्षेत्रज्ञं प्रति अविद्यात्मकत्वात् । क्षेत्रज्ञं निवघ्नन्ति इव । तम् आस्पदीकृत्य आत्मानं प्रतिलभन्ते इति निवघ्नन्ति इत्युच्यते । इति भाष्यम् । अत्र आनन्दगिरिः सत्त्वादिषु कथं गुणशब्दप्रवृत्तिरित्याशय परतन्त्रत्वादित्याह गणा इति । रूपादिष्विव गुणशब्दस्सत्त्वादिषु द्रव्याश्रितत्वं निमित्तीकृत्य किं न स्यादु इत्याशङ्का प्रकृत्यात्मकानां तेषां सर्वाश्रयत्वादु नैवम् इत्याह न रूपादिवदिति । गुणानां प्रकृतेश्च

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:5(1), May 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

पृथगुक्तेरन्यत्वे कुतस्तेषां प्रकृत्यात्मकत्वम् इत्याशक्य आह- न च गुणेति इत्याह । पुनश्चानन्दगिरिः क्षेत्रज्ञं प्रति नित्यपारतन्त्र्ये हेतुमाह - अविद्येति इत्याह । ततश्चाऽयमर्थः सत्त्वरजस्तम इत्येवं नामानो गुणाः गुणशब्दिताः परस्परवैषम्येण हेतूनां परस्परं प्रति अङ्गाङ्गिभावेन परिणताः प्रकृतेस्तेषां साम्यावस्थायाः स्वरूपस्य घटकाः । देहे प्रकृतिपरिणामविशेषरूपे शरीरे देहिनं देहवन्तम् अव्ययं निर्विकारं निबन्नन्तीव सुखदुःखमोहादिष्वविकारवत्तया उपदर्शयन्ति इति । अत्र एव शब्दानुषङ्गेण व्याख्यानात् न करोति, न लिप्यते इति यदुक्तं तेन विरोधः परिहृतो भवति ।

**गुणत्रयनिरूपणे सत्त्वगुणस्वरूपम्**

**तत्र सत्वं निर्मलत्वात् प्रकाशकमनामयम् ।**
**सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चाऽनघ ।।"**

यदा सत्वगुणाभिवृद्धिः तदा सुखं जातं भवति तच्च सुखं भोगातीतम् । सर्वेषु इन्द्रियेषु सत्वगुणप्रवृद्धौ प्रकाशो भवति यदा सदसद्विवेकरूपं ज्ञानं भवति तदा सत्त्वं विवृद्धं ज्ञेयम् ।

**सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते ।**
**ज्ञानं यदा तदा विद्यादु विवृद्धं सत्त्वमित्युत ।।**

एवं सत्वप्रवृद्धिकाले यदि देहत्यागस्य अवकाशो भवति तदा प्राणि महदादि तत्त्वविदां लोकान् ब्रह्मलोकादीन् प्राप्नोति । सत्त्वविरुद्धौ उत्तमलोकप्राप्तिरेव न तु कैवल्यप्राप्तिः कैवल्यं तु गुणातीतानामेव भवति ।

**यदा सत्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।**
**तदोत्तमविदां लोकान् अमलान् प्रतिपद्यते ।।**

**(अ) रजोगुणस्वरूपम्**

**रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।**
**तन्नबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ।।**
**लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।**
**रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ।।**

लोभः परद्रव्याणाम्, आदातुमिच्छा लौकिकेषु, काम्येषु निषिद्धेषु च कर्मसु उद्यमः कर्मणां अनुपशमः । ततो हर्षरागादि प्रवृत्तिः स्पृहा च । सर्वसामान्य वस्तुविषया तृष्णा । एते रजोगुणवता नैसर्गिकाः गुणाः । प्रवृद्धे रजोगुणे मृताः पुनः कर्मवतां मध्ये जन्म प्राप्नोति ।

**(आ) तमोगुणस्वरूपम्**

**तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।**
**प्रमादालस्य निद्राभिस्तन्निबध्नाति भारत ।।**
**अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।**
**तमस्येतानि जायन्ते विवृद्धे कुरु नन्दन ।।**

तमः अज्ञानात् जायते । तमस्विनां मोहो भवति तेन अविवेकः । अविवेकेन प्रमादः आलस्यं, निद्रा इत्यादि दुर्गुणाः भवन्ति। एते तमसः कार्याणि । तमोगुणे प्रवृद्धे मृतः मूढयोनिषु जन्म प्राप्नोति ।

**गुणत्रयसामान्यफलम्**

पूर्वकृतसुकृतानां निर्मलं सत्वगुणरूपं फलं भवति । रजसः फलं दुःखम् । तमसः फलं अज्ञानम् । सत्त्वगुणः ज्ञानजनकम् । रजोगुणः लोभजनकः । तमसा प्रमादमोहौ अज्ञानं च भवन्ति । सत्त्वगुणयुक्ताः ऊर्ध्वान् लोकान् गच्छन्ति। रजोगुणयुक्ताः मनुष्यलोके जायते । तमस्विनः अधोलोकान् गच्छन्ति । एतान् गुणानतिरिच्य चतुर्थो गुणो न भवत्येव ।

एतेषु गुणेषूक्तानि लक्षणानि देहिषु मिश्रीभूतान्यपि भवन्ति । अतः अस्मिन् एकान्तो गुणः इति निश्चित्य वक्तुं न पार्यते । सात्विके सत्वगुणाधिक्यं रजस्तमसोः अल्पांशः । तदा रजस्तमसी अभिभूय सत्त्वं भवति । रजसः अल्पसत्त्वगुणवान् ईषत् तमोगुणश्च भवति । एवं तामसोऽपि ।

**रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।**
**रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ।।**

हे भारत! यदा सत्त्वगुणः रजस्तमश्च तिरस्कृत्य, वर्धते तदा सत्त्वं ज्ञानसुखादि स्वकार्यं करोति । यदा तु रजो गुणः, सत्त्वतमसी तिरस्कृत्य वर्धते तदा स्वकार्यं कर्म तृष्णादि करोति तथा तमोगुणः (यदा) सत्त्वरजसी च अनुवर्तते, तदा तमोगुणः स्वकार्यं ज्ञानाऽऽवरणप्रमादादि आरभते इत्यर्थः ।

एवं गुणानुत्त्वा भगवान् निर्गुणस्यापि स्वरूपमुक्तवान् स्पष्टतया -

**कैर्लिङ्गैस्त्रीन् गुणानेतान् अतीतो भवति प्रभो ।**
**किमाचारः कथं चैतांस्त्रीन् गुणान् अतिवर्तते ।।**

श्री भगवान् उवाच

**प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।**
**न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ।।**
**उदासीनवदासीनो गुणैर्यो न विचाल्यते ।**
**गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ।।**
**समदुःखसुखः स्वस्थः समलोष्टाऽश्मकाञ्चनः ।**
**तुल्यप्रियाऽप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ।।**
**मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।**
**सर्वारम्भपरित्यागी गुणातीतः स उच्यते ।।**

एवं गुणानुत्त्वा भगवान् यद्यपि एते गुणाः नैसर्गिकास्तथापि अभ्यासेन क्वचित् गुणपरिवृत्तिरपि भवतीति गुणत्रयानुकूलं आहारदिकमपि निरूपितवान् । गुणान् अनुसृत्य श्रद्धापि द्विविधा भवति । तथैव प्रवृत्तिप्रकारमाश्रित्य कर्मणामगुणनाम्ना त्रैविध्यं भवतीति निरूपितवान् । सात्त्विकाः देवान् पूजयन्ति । रजोगुणप्रधानाः यक्षरक्षोगणान् पूजयन्ति । तमोनिष्ठाः भूतप्रेतगणान् पूजयन्तीति प्रबोधयति ।

**त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।**
**सात्विकी राजसी चैव तामसी चेति तां शृणु ।।**
**सत्त्वाऽनुरूपा सर्वस्य श्रद्धा भवति भारत ।**
**श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ।।**
**यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।**
**प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ।।**

आहारविधिमनुसृत्य गुणपरिवृत्तिरपि भवति । यदि राजसः सात्त्विकमाहारं सेवते तदा तस्मिन् सत्त्वगुणाभिवृद्धिर्भवति ।

**आयुः सत्त्वबलारोग्य सुखप्रीतिविवर्धनाः ।**
**रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ।।**
**कट्वाम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।**
**आहारो राजसस्येष्टा दुःखशोकाऽऽमयप्रदाः ।।**

सात्त्विको यज्ञफलमनपेक्ष्य विधिदृष्टः इत्येव मत्वा यजते । राजसस्तु क्वचित् आडम्वरार्थमाचारं दर्शयितुं यजते । तामसो विधिहीनं मन्त्रहीनं अन्नहीनं श्रद्धाहीनं च यज्ञं कुरुते ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:5(1), May 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

एवं तपोऽपि गुणत्रयानुसारेण त्रिविधं भवति । दानमपि त्रिविधं भवति । षष्ठे अध्याये गुणपरिवृत्तये जिज्ञासुना करणीयो यत्नोपि विवृतः ।

एवं चित्तभूमीः निरूप्य निरुद्धा चित्तभूमिः योगस्य विषयः इति शास्त्रारम्भप्रयोजनं दर्शितम् ।

**योगश्चित्तवृत्तिनिरोधः**

योगशास्त्रस्य प्रयोजनमुक्त्वा दर्शनं विवृणो **योगो द्विविधः** । **सम्प्रज्ञातः असम्प्रज्ञातश्चेति** सम्प्रज्ञातयोगस्तु निर्गुणात्मकः। स च समाधिलभ्यः। योगस्य चित्तवृत्तिनिरोधेन सगुणरूपे ब्रह्मणि व्याप्तायां चित्तवृत्तेः अपि ग्रहणं भवति । सर्वचित्तवृत्तिनिरोधः इति पदे सम्प्रज्ञातरूपे योगे लक्षणस्य अव्याप्तिरिति लक्षणे सर्वप्रदो न प्रयुक्तः ।

## त्रयः चित्तगुणाः

प्रख्या, प्रवृत्तिः, स्थितशीलत्वमिति चित्तं गुणत्रययुक्तं भवति ।

1) **प्रख्या** - प्रख्यारूपं चित्तं रजोगुणेन तमोगुणेन च संसृष्टं ऐश्वर्यविषयप्रियं भवति ।

2) **प्रवृत्तिः** - प्रवृत्तिरूपं चित्तं सत्वगुणलेशेन अनुविद्धं धर्मज्ञानवैराग्यैः योगचर्योपयोगं भवति ।

3) **स्थितिशीलम्** - स्थितिशीलं चित्तं सत्वप्रधानं रजोलेशयुक्तं च भवति । तृतीयवृत्तौ ध्यानानुकूलं प्रसंख्यानं भवति । सा चित्तवृत्तिः सम्प्रज्ञातसमाधेरपि कारणं भवति । स्थितिशीलचित्तवृत्त्या पुरुषस्य स्वरूपेण अवस्थानं कैवल्यसदृशं भवति ।

## चित्तवृत्तयः

योगसिद्धौ चित्तभूमीनां चित्तगुणानां च निरोधस्सहकारी भवति । तेनैव चित्तनिरोधेन पुरुषस्य ख्यातिर्भवति । ख्यातिरेव दर्शनम् इति योगिनां मतम् ।

चित्तव्यापाराणामनेकविधत्वात् सर्वाः चित्तवृत्तयः कथं रोद्धव्याः इति शङ्का परिहाराय अनन्ताश्च चित्तवृत्तीः पञ्चधा वर्गीकरोति । पञ्चसु अपि क्लिष्टाः, अक्लिष्टाः चेति द्विधा विभक्ताः । तासु क्लिष्टप्रवाहमध्ये पतिताः अक्लिष्टाः अपि भवन्ति । एवं क्लिष्टासु अक्लिष्टता च भवति । अक्लिष्टाः छिद्रेषु क्लिष्टाः भवन्ति । संस्कारैः वृत्तयः वृत्तिभिः संस्काराः इति वृत्तिसंस्कार चक्रं अनिशं भवत्येव । तदेवं भूतं चित्तं परिसमाप्ताधिकारं आत्मसदृशेन व्यवतिष्ठते प्रलयं वा गच्छति ।

**वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः ।**
**प्रमाणविपर्ययविकल्पनिद्रास्मृतयः** ।।

प्रमाणादीनमपि अवान्तरभेदाः भवन्ति ।

## 1. प्रमाणम्

अ) प्रमाणमपि त्रिविधं प्रत्यक्ष, अनुमानं, आगमं चेति । मनसा इन्द्रियसंयोगेन अर्थस्य विशेषावधारणप्रधानां वृत्तिः प्रत्यक्षं प्रमाणम् ।

आ) अनुमेयस्य वस्तुनस्तुल्यजातीयवस्तुना भिन्नजातीयेभ्यो व्यावृत्तं सम्बन्धं दृष्ट्वा सामान्यावधारणप्रधाना वृत्तिः अनुमानम् ।

इ) आप्तेन दृष्टः अनुमितः वा अर्थः इतरे स्वज्ञानसंक्रमणेनोपदेशकारणं भवति तदनुष्ठानं श्रोतुरागमः । आप्तवाक्यं शब्दः आगमप्रमाणमित्यर्थः ।

## 2. विपर्ययः

विपर्ययः मिथ्याज्ञानम् । अनुभूतस्यार्थस्य यत्र भिन्नतया बाधनं भवति स विपर्ययः । स च अविद्यादिमूलकः । अविद्यास्वरूपं साधनपादे निरूपणम् ।

## 3. विकल्पः

**शब्दज्ञानानुपाती वस्तु शून्यो विकल्पः ।**

कदाचित् अनुकूला कदाचित् विपर्यया च ।

## 4. निद्रा

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:5(1), May 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

निद्रा प्रसिद्धैव । निद्राकाले चित्तभ्रमोऽपि भवति । प्रवुद्धस्य प्रत्यवमर्शे मया मिथ्या दृष्टेति ज्ञानं भवति ।

**5. स्मृतिः** –

अनुभूतविषयस्य असम्प्रमोषः अर्थात् अविनाशिता स्मृतिः ।

एताः सर्वाः वृत्तयः सुखदुःखमोहात्मिकाः । एताः सर्वाः निरोद्धव्याः एव ।

## निरोधसाधनम्

**योगः चित्तवृत्तिनिरोधः** इत्युक्तम् । चित्तभूमयः, चित्तगुणाः, चित्तवृत्तयः च अन्योन्यसंश्लिष्टाः बहवो निरूपिताः। केवलं निरोधनादेशेन निरोधो न भवति । कथं योगः साध्यः इति चेत् तत् साधकं करणद्वयं निरूपयति -

**अभ्यासवैराग्याभ्यां तन्निरोधः** इति ।

चित्तवृत्तिः नदीरूपा । स उभयवाहिनी भवति । श्रेयसे भवति पापाय च । कैवल्यप्रवाहे विवेकविषयरूपनिम्नता लाभे कल्याणदायिनी भवति संसाराविवेकपातिनी पापरूपा। अज्ञानश्रोतसः निवृत्तिः ज्ञानपथे प्रवाहः इत्युभयधा अभ्यासः करणीयः । वैराग्यं विवेकेन तृष्णाक्षये इन्द्रियाणां वशीकारः एव ।

विषयभोगेषु दोषदर्शनेन वैराग्यं भवति 1 वितर्कविचारानन्दाऽस्मितारूपानुगमात् वैराग्यं सम्प्रज्ञात समाधेः कारणं भवति । वितर्कादिभिः चतुर्भिः कारणैः वैराग्यलाभे आराध्यस्य आत्मनः साकारेण कदाचित् ज्ञानं भवति कदाचित् विरामप्रत्ययभ्यासपूर्वः समाधिविशेषाः अपि भवन्ति स च असम्मज्ञातः ।

एवं समाधिः द्विविधः 1. उपायप्रत्ययः 2. भवप्रत्ययश्चेति ।

उपायः ईश्वरादि साकाररूपः । भवप्रत्ययः देहरहितानां भवति । एवं द्विविधस्यापि समाधेः प्रत्ययः एव कारणम् । प्रत्ययः कदाचित् प्राधान्येन सम्मज्ञातेन आराधितः परिणामे असम्प्रज्ञातः अर्थात् निर्विकल्पो भवति । प्रत्ययेन निराकारेण ध्यानस्य असिद्धेः चित्तनिरोधनाय सम्मज्ञातसमाधिः परिणामे आश्रीयते। एवं प्रथमं द्वितीयस्य द्वितीयं प्रथमस्येति अन्योपकारकं समाधिद्वयं भवति । उभयत्र प्रत्ययः एव कारणम् इति आचार्य ऐ. के. तैमनि स योगदर्शनव्याख्यायां निरूपितवान् ।

**प्रत्ययः**

**सम्मज्ञात समाधिः-असम्मज्ञात समाधिः सम्मज्ञातसमाधिः**

कस्य साधकस्य कीदृशी समाजसिद्धिः भवति इति पञ्चभिः सूत्रैः निरूपितम् । एवं योगससाधनं क्लेशशातरमुत्त्क्त्वा ततः सुलभतरः उपायः अपि पतञ्जलिना योगसिद्धये निरूपितः ।

ईश्वरप्रणिधानाद्वा इति प्रणिधानं च अनन्यधिया भगवतः चिन्तनं भगवति कर्मार्पणं चेति भगवता भगवद्गीतासु स्पष्टं निरूपितम् -

**यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।**
**यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम ।।**
**अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।**
**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।।**

कोऽयमीश्वरः तत्प्रणिधानेन किं वा फलमिति सन्देहो भवत्येव । नास्तिकाः निरीश्वराः वेदान्तिषु सांख्याः एवं साकारं भगवत्स्वरूपं निराकुर्वतामपि मते अदृश्या काचनशक्तिः अपरिहार्यतया अङ्गीकार्या । तादृशीशक्तिः एव ईश्वरः । भक्तिज्ञानवैराग्याणि आस्तिकानेव अङ्गीकार्याणि । ते तेभ्यः आध्यात्मिकं फलमेव इच्छन्ति । न केवलमाध्यात्मिकम् ईश्वराङ्गीकारेण वैज्ञानिकं किमपि अपूर्वं भवति । एषा अदृश्यः शक्तिरेव, ईश्वरः । स च साकारः निराकारो वा भवतु । किन्तु तस्याङ्गीकारे सर्वे क्लेशाः अपगताः भवन्त्येवेति वैज्ञानिकं प्रयोजनमपि ईश्वराङ्गीकारेण सिद्धमेवेति अग्रे वक्ष्यते ।

**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः ।।**

**तस्य वाचकः प्रणवः ।।**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:5(1), May 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

प्रणवोच्चारणेन जायमानो ध्वनिविशेषो बहुविधवैज्ञानिकप्रयोजनसाधकः इति ऐन्टीन् महोदयैः अभिमतमग्रे वक्ष्यते ।

योगसिद्धौ योगसाधने च बहवो अन्तरायाः भवन्ति । ते एव न केवलं योगनाशकाः नित्यजीवननाशकाश्च भवन्तीति प्रोच्यते-

**व्याधिस्त्यानसंशयप्रमादालस्याविरति भ्रान्ति**
**दर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः ।।**

**एते नवान्तरायाः**

1. **व्याधिः** रोगः सच वातपित्तश्लेष्मादि बहुकारणजन्यो भवति ।
2. **स्त्यानम्** - मनसः अकर्मण्यता । कदाचित् मनः अचलं कर्तव्याचरणात् विमुखं भवति ।
3. **संशयः** कार्याकार्ययोः निर्णये अशक्तः । सम्यक् निर्णेतुं अशक्तत्वात् कार्ये न प्रवर्तते ।
4. **प्रमादः** - समाधिसाधनानामभवनम् । लौकिककार्येषु जागरूकतायाः अभावः ।
5. **आलस्यं** - मनसः, शरीरस्य च गुरुत्वात् कार्ये अप्रवृत्तिः ।
6. **अवितातिः** - निरन्तर चिन्तनम् ।
7. **भ्रान्तिदर्शनम्** - विपर्ययज्ञानम् ।
8. **अलब्धभूमिकत्वम्** - समाधि भूमेः अलाभः। लौकिककार्य अवकाशस्याभावः ।
9. **अनवस्थितत्वम्** - लब्धायां भूमौ चित्तस्य स्थैर्याभावः ।

एभिः नवभिः चित्तविक्षेपो दुःखदौ मनस्यादयः चित्तक्लेशकारणानि भवन्ति । तेषां वारणार्थः अभ्यासः कार्यः । एवं निरन्तराभ्यासेन, समकालं मैत्री कारणाधीनं अनुसरणेन चित्तप्रसादनं सम्पाद्यम् –

**मैत्री करुणामुदितोपेक्षणाः सुखदुःखपुण्याऽपुण्यविषयाणां भावना तश्चित्तप्रसादजम् ।**

मैत्री करुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावना तश्चित्तप्रसादजम् ।

मैत्री करणादिभिः चित्तस्य प्रसादनम् । प्राणायामेन शारीरक-मानसिक क्लेशापनयनं इन्द्रियाणां प्रत्याहारात् इन्द्रियव्यापाररोधेन मनसः एकाग्रता सम्पाद्या । धारणया भास्वरस्वरूपतो भगवतो हृदये धारणं कुर्यात् । अनन्तरेषु सूत्रेषु धारणया भास्वरस्वरूपतो भगवतो हृदये धारणं कुर्यात् । अनन्तरेषु सूत्रेषु मनसः स्थितिसाधनं सम्प्रज्ञातसमाधेः सम्पादनं स्मृतिपरिशुद्धिरित्यादि योगसाधनैः समाधि प्राप्य शब्दार्थज्ञानविकल्पैः सवितर्कः समाधिर्भवति ।

**स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का** ।

एवमनन्तरेषु अष्टसु सूत्रेषु निर्विकल्पसमाधेः स्वरूपं निरूपितम् । द्वितीयपादे अद्यतनकाले आचरितः अष्टाङ्गयोगो वर्णितः।

## उपसंहारः

योगदर्शनं भौतिकप्रयोजनेषु शारीरिक, मानसिकशुद्धिसम्पादकमपि आध्यात्मिकं प्रयोजनमेव अस्मादधिकमपेक्षितं तदेवोपदिष्टं च । प्रायशः आध्यात्मिकतत्त्वं न तर्कसहिष्णुर्भवति । एवं कथने अयं हेतुरिति आध्यात्मिकविषयं अधिकृत्य कोऽपि वक्तुं न प्रभवति। योगदर्शनस्य सम्यक् परिशीलनेनात्र प्रकरणानां कार्यकारणभावहेतुवद्धत्वं अन्योन्यसम्बन्धः स्पष्टो भवति ।